संस्कृत

विधि

-ग्रं.नं. ११२

११२

स्वप्नविधिः

" Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai. "

(१)

श्रीरामचंद्रायसत्रिकायसांगायसपरिवारायसपार्षदायनम
:॥अथस्वप्नविचार:॥स्वप्नोद्विविध:॥इष्टफलोनिष्टफलश्चे
ति॥तत्रसामान्यतइष्टफलोयथा॥नदीसमुद्रतरणमाका
शगमनंतथा॥ग्रहनक्षत्रमार्तंडचंद्रमंडलदर्शनं॥हर्म्यस्या
रोहणंचैवप्रासादशिखरारोपिवा॥स्वप्नेचमदिरापानंचसा
मांसस्यभक्षणं॥२॥कृमिविष्टानुलेपश्चरुधिरेणाभिषे
चनं॥रत्नान्याभरणादीनिस्वप्नेदृष्ट्वाप्रसिध्यति॥३॥देव
ताविप्रपृथ्वीशगान्प्रशस्ताभरणांगना:॥वृषभेपर्वतक्षीरि १
फलीवृक्षादिरोहणं॥४॥दर्पणामिषमाल्यप्राप्ति:शुक्लपुष्पां
बराश्रितान्॥इष्टस्वप्नेर्यलाभ:स्याद्व्याधिमोक्षश्चजायते॥

Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

1A

॥५॥ अथानिष्टफलः॥ दुष्टं किंशुकवल्मीकपारिभद्रादिरोह
णं॥ तैलकार्पासपिण्याकलोहप्राप्तिर्विपत्तये॥१॥ विवाहक
रणं स्वप्ने रक्तस्रग्वस्त्रधारणं॥ स्त्रीगतसाहरणं नेष्टं पक्वमांस
स्य भोजनं॥२॥ आदित्यस्याथ चंद्रस्य निष्प्रभस्यावलोकनं॥
नक्षत्रादेश्च पातश्च स्वप्ने मरणशोककृत॥३॥ अशोककर
वीरपलाशानां पुष्पितानां स्वप्ने दर्शने शोकः॥ नौकारोहणे प्र
वास रक्तवस्त्रगंधधारिण्या स्त्रिया लिंगने मृत्युः॥४॥ घृत
तैलादिनाभ्यंगे व्याधिः॥ केशदंतपाते धननाशः॥ पुत्रशोको
वा॥ खरोष्ट्रमहिषैर्याने तत्कूर रथारोहणे वा मृत्युः॥ कर्णना
साकरादिच्छेदे पंकमज्जने तैलाभ्यंगे विषभक्षणे प्रेतालिंग

Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai. Joint project of the

(2)

स्वप्नवि॰ २

नेनलद्म्यालिप्तो दिगंबरस्य याने कृष्णपुरुषदर्शने मृत्युः ॥ अथ
जागृतावनिष्टानि ॥ अरुंधतीं ध्रुवं चैव च नभा मंदाकिनीं तथा ॥ स्व
नासाग्रं च चंद्रार्कमायुर्हीनो न पश्यति ॥३॥ पांसुपंकादिषु न्यस्तं
चरणं खंडितं यदि ॥ स्नानो[illegible] गात्रस्य यस्याशु प्राक् प्रशु
ष्यति ॥२॥ गोत्रणादिषु [illegible]र्यादिद्वयदर्शनं ॥ स्वर्णप्रती
तिर्वृक्षेषु स्वपदानां सदृशं न ॥३॥ पिहिते कर्णयुगुले यस्य घो
षानुपश्यति ॥ अदर्शनं स्वशिरसः प्रतिबिंबे जलादिषु ॥४॥
छिद्रप्रतीतिश्छायायां स चिरं नैव जीवति ॥ ॥ अथ विशेषदृ
ष्टफलाः स्वप्नाः ॥ यस्तु पश्यति वै स्वप्ने राजानं कुंजरं हयं ॥ स्व
र्णं वृषभं गां वा कुटुंबं तस्य वर्धते ॥ वृषं वृक्षं वारुह्य नभस्थ २

स्यजागरेधनावाप्तिः॥श्वेतेनसर्पेणदक्षिणभुजदंशेनदशाहिने
सहस्रंधनलाभः॥जलस्थस्यवृश्चिकोरगग्रासेजयपुत्रधना
प्ति॥प्रासादशैलारोहणेसमुद्रतरणेराज्यं॥तडागमध्येपद्मप
त्रेषुघृतपायसभोजनेराज्यं॥बलाकाकुक्कुटीक्रौंचीदर्शनेभा
र्याप्राप्तिः॥निगडैर्बंधेवकूपाशाबंधेवापुत्रधनादि॥आसनेश
यनेयानेशरीरेवाहनेग्रहे॥ज्वलमानेविबुध्येततस्यश्रीःसर्व
तोमुखी॥सूर्यचंद्रमंडलदर्शनेरोगिणोरोगनाशोन्यस्यधनं॥
रक्तरारुधिरयोःपानेविप्रस्यविद्याशूद्रादेर्धनं॥शुक्लांबरगंध
धारिण्यास्त्रभगस्त्रियालिंगनेसंपत्तिः॥छत्रपादुकोपानहत्
खड्गलाभेधनं॥वृषभयुक्तरथारोहणेधनं॥दधिलाभेवेदाप्तिः॥

Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

(3)

स्वप्नवि० ३

दधिपयःपानेघृतलाभेचयशः॥घृतभक्षणेक्लेशः।आंत्रैर्वेष्टने
राज्यं।मनुष्यस्यचरणमांसभक्षणेशतंलाभः॥बाहुभक्षणेसह
स्रं।शीर्षमांसभक्षणेराज्यंवा।सहस्रधनंवा।सफेनक्षीरपानेसो
मपानं॥गोधूमदर्शनेधनलाभः।यवदर्शनेयज्ञः।गौरसर्षपदर्श
नेलाभः॥नागपत्रंलभेत्स्वप्नेकर्पूरागमनंतथा।चंदनंपांडुरंपु
ष्पंतस्यश्रीःसर्वतोमुखी।सर्वाणिशुक्लान्यतिशोभनानिकार्पा
सभस्मोदनतक्रवर्ज्यं।सर्वाणिकृष्णान्यतिनिंदितानिगोहस्तिदे
वद्विजवाजिवर्ज्यं।स्वप्नस्तुप्रथमेयामेवत्सरांतेफलप्रदः॥द्वि ३
तीयेष्टमासैःतृतीयेत्रिमासांते।चतुर्थेयामेमासांते।अरुणो
दयेदशाहांते।सूर्योदयेसद्यःफलं॥ ॥अथदुःस्वप्नदर्शनेक

3अ

र्य ॥ योमेराजन्निस्यत्वासूर्योपस्थानेदुःस्वप्ननाशः ॥ अथ स्वप्न
स्येनिजपाद्दा ॥ कश्चिद्दर्शविस्त्राद्रेनदुःस्वप्ननाशः ॥ चंडीसप्तश
तीपाठेनवा ॥ यद्वाश्रीविष्णुसहस्रनामस्तोत्रजपः कार्यः ॥ अथ
वाश्रीभारतस्थस्यश्रीमद्भागवतस्थस्यवागजेंद्रमोक्षस्यश्रवणं
पाठोवाइति ॥ ॥ इतिधर्मसिंधौक्तस्वप्नविधिः ॥ ॥छ॥ ॥
ग्रंथस्थसूत्रोक्तदुःस्वप्ननाशनस्यांति ॥ अद्यानोदेवसवितरितिद्वा
भ्यांयश्चगोषुदुःस्वप्न्यमितिपंचभिर्वाहिरण्यमुपतिष्ठेत । योमेराजन्
युज्योवासखावेतिवा ॥ ॥ श्रीरामचंद्रार्पणमस्तु ॥ छ ॥ श्रीम
त्सीतारामायनमोनमः ॥ ॥ श्रीरामःप्रीयतां ॥ श्रीरघुवीरसम
र्थ ॥ शके १७९८ माघकृष्ण दशम्यांसमाप्तः ॥ ॥छ॥ ॥छ॥ ॥

Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

## मूळ प्रत पाहण्यासाठी संपर्क

**इतिहासाचार्य वि.का. राजवाडे संशोधन मंडळ, धुळे**
राजवाडे पथ, गल्ली नं. १, धुळे-४२४००१ (महाराष्ट्र)
**दूरध्वनी क्रमांक** (०२५६२) २३३८४८
**Email ID** : rajwademandaldhule@gmail.com